# ॥ મોહિન્યર્ગલાસ્તોત્રમ્ ॥

.. mohinyargalAstotram ..

sanskritdocuments.org

August 20, 2017

# .. mohinyargalAstotram ..

# ॥ મોહિન્યર્ગલાસ્તોત્રમ્ ॥

## Sanskrit Document Information

Text title : mohinyargalAstotram

File name : mohinyargalAstotram.itx

Category : devii

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : Brihatstotraratnakara 2, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225-425

Latest update : February 10, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ મોહિન્યર્ગલાસ્તોત્રમ્ ॥

શ્રીગણેશાય નમઃ ॥

દેવા ઊચુઃ ।
જય મઙ્ગલરૂપે ત્વ જય ત્વં ભક્તવત્સલે ।
જય સૌદર્યનિલયે જય કારુણ્યવારિધે ॥ ૧॥

મહાલયે ભો કરુણાલયે માં ત્વં ત્રાહિ દીનાર્તિહરે પ્રપન્નમ્ ।
ત્વત્પાદપદ્માવનતોત્તમાઙ્ગં પ્રસીદ નિત્યં વરદે શરણ્યે ॥ ૨॥

ત્વં વિષ્ણુરૂપિણી દેવિ ત્વં ચ રુદ્રસ્વરૂપિણી ।
ત્વં બ્રાહ્મી ત્વં ચ શર્વાણી ત્વમિન્દ્રાણીતિ ગીયસે ॥ ૩॥

ત્વં કલ્યાણી ચ શ્રીર્વાણી સૈંહિકેયવિદારિણી ।
ત્વમિન્દ્રાણી ચ સૌપર્ણી કાદ્રવેયવિદારિણી ॥ ૪॥

વૈકુણ્ઠપદનિઃશ્રેણી નિર્જરાણાં તરઙ્ગિણી ।
ગઙ્ગાધરસ્ય રમણી નિધિવાસપ્રવાસિની ॥ ૫॥

સંહારિણી ચ વિપદાં સમ્પત્સન્તતિકારિણી ।
ભવપાશમહાપાશગેહપાશવિદારિણી ॥ ૬॥

સ્કન્દ ઉવાચ ।
ઇતિ તે ત્રિદશાઃ સ્તુત્વા જનાર્દનમનન્તરમ્ ।
સ્ત્રીરૂપેણાતિશોભાઢ્યં મોહિનીરૂપકં જગુઃ ॥ ૭॥

દેવા ઊચુઃ ।
શૃઙ્ગારલાવણ્યસમુદ્રરૂપિણી સ્વરૂપશોભારતિકોટિજિત્વરા ।
ત્વમેવ કામીપ્સિતદાતૃદાનદા દેવી મુદા રક્ષતુ દૈત્યમોહિની ॥ ૮॥

પ્રતારણાભિજ્ઞતમા સુરારિણાં નમઃ શિરશ્છેદનકારિવિક્રમા ।
સ્વરૂપસમ્મોહિતદાનવવ્રજા દેવી મુદા રક્ષતુ દૈત્યમોહિની ॥ ૯॥

દદાતિ દોર્ભ્યામપિ યા ચતુર્ભુજા શ્રિયં હિતત્રેતિવિભૂષણાઙ્કનૈઃ ।
આપત્તિદારિદ્યવિનાશકારિણી દેવી મુદા રક્ષનુ દૈત્યમોહિની ॥ ૧૦॥

પીયૂષદાત્રી સુતનુર્દિવૌકસાં દિતેઃ સુતાનાં ચ સુરાપ્રદાત્રી ।
ગૃહીતમાયા મયકામિનીવપુર્દેવી મુદા રક્ષતુ દૈત્યમોહિની ॥ ૧૧॥

સુવર્ણપઙ્કેરુહકેતકીશ્રિયં શરીરવર્ણેન ચ જિત્વરા પ્રસૂઃ ।
સ્વકણ્ઠધિક્કારિતવલ્લકીગુણા દેવી મુદા રક્ષતુ દૈત્યમોહિની ॥ ૧૨॥

સ્વદીપ્તકોટીન્દુકૃતપ્રભાશ્રયા પ્રભાવિની દૈવતકામપૂરિણી ।
અખણ્ડમાખણ્ડલનિર્જરસ્તુતા દેવી મુદા રક્ષતુ દૈત્યમોહિની ॥ ૧૩॥

યસ્યાઃ પ્રભાવં દ્વિસહસ્રજિહ્વઃ સહસ્રવક્ત્રોઽપ્યુરગાધિરાજઃ ।
વક્તું પ્રભુર્ન ક્વ તદેતરે જના દેવી મુદા રક્ષતુ દૈત્યમોહિની ॥ ૧૪॥

સ્કન્દ ઉવાચ ।
ઇતિ સ્તુતા તૈસ્ત્રિદશૈઃ સ્વભાવૈઃ સા મોહિનીરૂપમધોક્ષજસ્ય ।
ઉવાચ વાક્યં વિનયપ્રસન્ના શ્લક્ષ્ણં તદા તાન્પ્રણતાનુદારાન્ ॥ ૧૫॥

મોહિન્યુવાચ ।
આદૌ પુરુષરૂપેણ સંસ્તુતોઽહં જનાર્દનઃ ।
તતઃ સીમન્તિનીરૂપા ભવદ્ભિર્મોહિની સ્તુતા ॥ ૧૬॥

અથ ચૈષ મહાપુણ્યપુરુષપ્રકૃતિસ્તવઃ ।
ય એનં પઠતે નિત્યં પ્રાતરુત્થાય માનવઃ ॥ ૧૭॥

મત્સમીપે વિશેષેણ શુચિર્ભૂત્વા ધૃતવ્રતઃ ।
ન દારિદ્ર્યં ભવેત્તસ્ય ન સઙ્કટમવાપ્નુયાત્ ॥ ૧૮॥

આરોગ્યં સતતં ગચ્છેન્ન સ રોગૈઃ પ્રબાધતે ।
ભૂતપ્રેતપિશાચાનાં ન બાધાભિઃ સ ભૂયતે ॥ ૧૯॥

મરણેઽપિ શુભાઁલ્લોકાન્પ્રાપ્નોતીતિ વિનિશ્ચિતમ્ ।
ઇદં ક્ષેત્રં મહાપુણ્યં વૃદ્ધાતીરમિતિ શ્રુતમ્ ॥ ૨૦॥

વિશેષેણાધુના જાતં યુષ્મત્પઙ્ક્તિનિષેવણાત્ ।
મહાલયેતિ વિખ્યાતિં યાતાઽહં મોહિની સ્વયમ્ ॥ ૨૧॥

વસામ્યત્ર સુરાઃ સર્વે ભવન્તોઽપિ વસિષ્યથ ।
ત્રિરાત્રં મત્સમીપે યો મોહિન્યા અર્ગલાસ્તવમ્ ॥ ૨૨॥

સદા પઠતિ સશ્રદ્ધસ્તસ્યાહં વાઞ્છિતપ્રદા ।
મદ્દર્શનકૃતાં પુંસાં મુક્તિરેવ ન સંશયઃ ॥ ૨૩॥

ઇતિ શ્રીમોહિન્યર્ગલાસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. mohinyargalAstotram ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLATEX 0.99996

on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*